SYNOPSIS

(शोधप्रबन्धसारः)

“अद्वैतद्वैतविशिष्टाद्वैतरीत्या महावाक्यार्थविचारः”

अस्य शोधप्रबन्धस्य अध्यायसप्तकं वर्तते। यथा-

१. प्रथमोऽध्यायः

आमुखपठनम्

१.१. नास्तिकदर्शनानां सामान्यनिरूपणम्

१.१.१. दर्शनम् - स्वरूपपर्यालोचना

१.१.२. दर्शनम् - जिज्ञासाविर्भूतम्

१.१.३. चार्वाकदर्शनम्

१.१.४. जैनदर्शनम्

१.१.५. बौद्धदर्शनम्

१.२. आस्तिकदर्शनानां सामान्यविचारः

१.२.१. सांख्यदर्शनम्

१.२.२. योगदर्शनम्

१.२.३. न्यायदर्शनम्

१.२.४. वैशेषिकदर्शनम्

१.२.५. मीमांसादर्शनम्

१.३. वेदान्तदर्शनम् (उत्तरमीमांसा)

१.३.१. श्रीशङ्कराद्वैतवेदान्तवादः

१.३.२. श्रीशङ्करोत्तरवेदान्तवादाः

१.३.२.१. विशिष्टाद्वैतदर्शनम्

१.३.२.२. द्वैतदर्शनम्

१.३.२.३. भेदाभेददर्शनम्

१.३.२.४. द्वैताद्वैतदर्शनम्

१.३.२.५. शुद्धाद्वैतदर्शनम्

२. द्वितीयोऽध्यायः

महावाक्यानां सामान्यविचारः स्वरूपकथनं च

२.१. महावाक्यानां सामान्यस्वभावः

२.२. महावाक्यानां पाठक्रमः

२.३. महावाक्यानां सार्थकता

२.४. शुकरहस्योपनिषदि महावाक्यानां स्वरूपम्

२.५. पैङ्गलोपनिषदि महावाक्यानां स्वरूपम्

२.६. बह्वृचोपनिषदि महावाक्यानां स्वरूपम्

२.७. उपनिषत्संख्यायां मतभेदः

३. तृतीयोऽध्यायः

“अयमात्मा ब्रह्म” इति महावाक्यस्य समीक्षा

३.१. शङ्करमतम्

३.२. मध्वमतम्

३.३. रामानुजमतम्

४. चतुर्थोऽध्यायः

“प्रज्ञानं ब्रह्म” इति महावाक्यस्य गौरवात्मकं पठनम्

४.१. शङ्करमतम्

४.२. मध्वमतम्

४.३. रामानुजमतम्

५. पञ्चमोऽध्यायः

“तत्त्वमसि” इति महावाक्यस्य अन्वेषणात्मकं पठनम्

५.१. शङ्करमतम्

५.२. मध्वमतम्

५.३. रामानुजमतम्

६. षष्ठोऽध्यायः

“अहं ब्रह्मास्मि” इति महावाक्यस्य गहनतमं पठनम्

६.१. शङ्करमतम्

६.२. मध्वमतम्

६.३. रामानुजमतम्

७. सप्तमोऽध्यायः

निर्णयसंक्षेपः

आमुखपठनात्मके प्रथमेऽध्याये नास्तिकदर्शनानां सामान्यनिरूपणं कृतं वर्तते। अत्र चार्वाकदर्शनम्, जैनदर्शनम्, बौद्धदर्शनम्, शून्यवादः, क्षणिकविज्ञानवादः, ज्ञानाकारबाह्यार्थवादः, प्रत्यक्षस्वलक्षणक्षणिक बाह्यार्थवादः, सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, मीमांसादर्शनम्, वेदान्तदर्शनम् इत्यादयः विषयाः, विन्यस्ताः। नास्तिकदर्शनस्य विन्यासानन्तरम् आस्तिकदर्शनानां सामान्यविचाराय श्रद्धा प्रदत्ता वर्तते। तत्र आस्तिकदर्शनेषु सांख्यदर्शनम्, योगदर्शनम्, न्यायदर्शनम्, वैशेषिकदर्शनम्, मीमांसादर्शनं च अधिकृत्य विषयाः लिखिताः। तदनन्तरं वेदान्तदर्शनस्य (उत्तरमीमांसायाः) विचारः। तत्र श्रीशङ्कराद्वैतवेदान्तः, श्रीशङ्करोत्तरवेदान्तविषयाश्च परिगणिताः। तत्र भेदाभेददर्शनम्, द्वैताद्वैतदर्शनम्, द्वैतदर्शनम्, विशिष्टाद्वैतदर्शनम्, शुद्धाद्वैतदर्शनम् इत्यादिविषयाः समुपन्यस्ताः वर्तन्ते।

वेदान्तर्गतेषु कर्मकाण्डोपासनाकाण्डज्ञानकाण्डेषु कर्मकाण्डः ऐहिकसुखसम्पादनाय, उपासनाकाण्डः ऊर्ध्वलोकप्राप्तये, ज्ञानकाण्डः जननमरणराहित्याय ब्रह्मप्राप्तये च उपायभूताः सन्ति। कर्मकाण्डोपासनाकाण्डौ संसारान्तर्गतौ। ज्ञानकाण्डस्तु संसारातीतश्च।

नरजन्मपरमलक्ष्यन्तु संसारसागरस्य तरणेन संसारदुःखात् मोचनम् इति आमनन्ति विद्वांसः। तत्र परं शाश्वती शान्तिः समाधानञ्च। एवं ज्ञानकाण्डं मनुष्यान् परमलक्ष्यं नेतुं समर्थं भवति। ज्ञानकाण्डविषयाः उपनिषदन्तर्भूताः। आत्मविद्यायाः अमूल्यानि रत्नानि भवन्ति उपनिषदः। भौतिकविज्ञाने आर्जितानि सर्वाणि विज्ञानानि नितान्तशान्तये समाधानाय च न प्रभवन्ति। आध्यात्मिकज्ञानं परं परमशान्तये समाधानाय च अलम्। अधुनापि तस्मादेव कारणात् वेदान्तविषयः तत्त्वदर्शनरूपताम् आदाय मानवहृदयेषु नरीनर्ति सदा मुदा।

उपनिषद्दर्शनेषु बहवः विभागाः सन्ति। तेषु आदिशङ्कराचार्यस्य अद्वैतमतम्, मध्वाचार्यस्य द्वैतमतम्, रामानुजाचार्यस्य विशिष्टाद्वैतमतञ्च विशिष्य प्रतिपादनम् अर्हन्ति। शोधप्रबन्धेऽस्मिन् उपर्युक्तमतत्रयमाश्रित्य “अयमात्मा ब्रह्म”, “प्रज्ञानं ब्रह्म”, “तत्त्वमसि”, “अहं ब्रह्मास्मि” इत्येतत् महावाक्यचतुष्टयं विवेचनात्मकबुद्ध्या पठितं वर्तते। यद्यपि एतानि वाक्यानि भिन्नोपनिषदन्तर्गतानि तथापि तानि वाक्यानि परस्परसमन्वयभावम् आवहन्ति। यथा– “अयमात्मा ब्रह्म” इति महावाक्यं ब्रह्मनिर्देशकथनात्मकं भवति। “प्रज्ञानं ब्रह्म” इति वाक्यं ब्रह्मस्वरूपकथनात्मकं भवति।

“तत्त्वमसि” इति वाक्यं साधकं प्रत्युक्तम् उपदेशवाक्यं भवति। “अहं ब्रह्मास्मि” इति अन्तिमं महावाक्यं भक्तविषये अन्तिमम् अनुभववाक्यं च भवति।

यद्यपि एतानि वाक्यानि भिन्नोपनिषदन्तर्गतानि तथापि तानि परस्परसाकाङ्क्षवाक्यानि च भवन्ति इति वैशिष्ट्यम्। तस्मादेव कारणात् उपनिषदां मध्यात् एतानि वाक्यानि स्वीकृत्य परस्परान्वयेन दर्शनसमष्टेः विवरणाय प्रयुज्यन्ते। एतदेव महावाक्यानामेषां प्रथमं महत्त्वम्। ब्रह्मैक्यसूचकानि वेदान्तमुख्यवाक्यानि भवन्ति इमानि।

१) यद्यपि माहावाक्यचतुष्टयं बहुप्राचीनकालादारभ्य स्वीकृतं वर्तते तथापि तेषां विषये इतःपर्यन्तं न कोऽपि पृथक् पठनं कृतवान् इत्यतः ममायं प्रबन्धः विषयेऽस्मिन् प्रथमः प्रयत्नः इति विशेषः।

२) आत्मैक्यसूचकानि अन्यान्यपि वाक्यानि यद्यपि उपनिषत्सु प्रभूततया वर्तन्ते तथापि तानि न इह मुख्यतया स्वीकृतानि। एवमपि शोधप्रबन्धेऽस्मिन् तान्यपि यथायोग्यं सञ्चयनं कृत्वा पट्टिकारूपेण प्रदत्तानि वर्तन्ते इति शोधप्रबन्धस्यास्य द्वितीयं वैशिष्ट्यम्।

३) प्रकृतमहावाक्यचतुष्टयस्य अन्यवाक्यापेक्षया वैशिष्ट्यं वर्तते वा इति प्रश्ने कृते वर्तते इत्युत्तरम्। एषां वाक्यानां ऋग्यजुस्सामाथर्ववेदाधारत्वं वर्तते इति वाक्यानां वैशिष्ट्यमपि इह सूचितम्।

वस्तुतः एतानि महावाक्यानि तत्तद्वेदान्तर्गतानि इत्येतदेव तादृशीं संज्ञां वोढुं अर्हन्ति। तथा हि– "प्रज्ञानं ब्रह्म" इत्येतद् ऋग्वेदसम्बन्धि महावाक्यम्। "अहं ब्रह्मास्मि" इत्येतद् यजुर्वेदान्तर्गतं महावाक्यम्। "तत्त्वमसि" इति वाक्यं सामवेदसम्बन्धि। "अयमात्मा ब्रह्म" इत्येतद् अथर्ववेदसम्बन्धि वाक्यम्। "प्रज्ञानं ब्रह्म" इति वाक्यं जीवस्य ब्रह्मणः च लक्षणवाक्यं भवति। "अहं ब्रह्मास्मि" इति वाक्यं तत्त्वश्रवणानन्तरं शिष्ये सञ्जातम् अनुभवं द्योतयति। गुरूपदेशद्वारा निरस्तसंशयः शिष्यः यदा प्रबोधितो भवति तदा तस्मिन् सञ्जाता अवस्था इयं भवति। 'तत्त्वमसि' इति वाक्यं शिष्यस्य अज्ञानापनोदनाय तं ब्रह्मस्वरूपतया निवेदयति। "अयमात्मा ब्रह्म" इति जीवात्मपरमात्मनोः अपरोक्षत्वं द्योतयति। स्वरूपसाक्षात्कारेऽपि इदं वाक्यं सूचनां प्रददाति।

अध्याये द्वितीये महावाक्यानां तत्त्वं, तेषां महत्वं ब्रह्मात्मैक्यप्रतिपादनत्वं च सूचितम्। उपनिषदन्तर्गतवाक्यान्तर्भूतानां तेषां विषये पूर्णार्थप्रतिपादनं युक्ततया कृतं वर्तते। केन महावाक्येन किं कार्यं इत्यपि इह चिन्तितं भवति। “प्रज्ञानं ब्रह्म” प्रभृतीनि वाक्यानि महावाक्यत्वं कुतः अलङ्कुर्वन्ति इति विषयेऽपि विचारः कृतो वर्तते। महावाक्यानां क्रमविषये अपि अत्र विचारः कृतः। वाक्यानामेषां सिद्धार्थबोधकत्वमपि इह सूचितम्। एवम् एषां– १) महावाक्यानि २) वेदान्तवाक्यानि ३) सिद्धार्थबोधकानि वाक्यानीति च संज्ञा।

महावाक्यानाम् अवबोधः न केवलेन वाच्यार्थेन भवतीत्यतः अत्र लक्ष्यार्थोऽपि स्वीकृतः। प्रकरणानुसारेण शब्दशक्तिवृत्तिमधिकृत्यापि लघुपठनं कृतम्। प्रसङ्गवशात् लक्षणाप्रभेदोऽपि इह पठितो वर्तते। शुकरहस्योपनिषदि महावाक्यचतुष्टयस्य यत् प्रतिपादनं कृतं तत् पट्टिकायां प्रदत्तं वर्तते इह।

महावाक्यम्	वेदः	उपनिषद्
१. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
२. अहं ब्रह्मास्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्

संवेदनानुकूलक्रमम् आश्रित्य या पट्टिका वर्तते सापि इह लिखिता वर्तते। यथा–

महावाक्यम्	वेदः	उपनिषद्
१. अयमात्मा ब्रह्म	अथर्ववेदः	माण्डूक्योपनिषद्
२. प्रज्ञानं ब्रह्म	ऋग्वेदः	ऐतरेयोपनिषद्
३. तत्त्वमसि	सामवेदः	छान्दोग्योपनिषद्
४. अहं ब्रह्मास्मि	यजुर्वेदः	बृहदारण्यकोपनिषद्

एवं वेदानां स्वतःसिद्धप्रामाण्यं पौर्वापर्यञ्चाश्रित्य प्रथमरेखाचित्रस्थः क्रमः। संवेदनक्रममाश्रित्य द्वितीयरेखाचित्रस्थः क्रमः। शुकरहस्योपनिषदि महावाक्यानि यया रीत्या लिखितानि तान्यपि इह सूचितानि। यथा–

१. ॐ प्रज्ञानं ब्रह्म

२. ॐ अहं ब्रह्मास्मि

३. ॐ तत्त्वमसि

४. ॐ अयमात्मा ब्रह्म

शुकरहस्योपनिषदि महावाक्यानां विषये कृतं अर्थविवरणमपि इह सूचितम्। उपनिषदां भाष्यं श्रीशङ्कराचार्येण प्रथमं कृतमित्यतः, ऋषित्रयस्वीकृतः, शङ्कर-मध्व-रामानुजकृतः महावाक्यक्रमः श्रीशङ्करकल्पितः इत्यवगन्तुं शक्यते।

पैङ्गलोपनिषदि अपि महावाक्यचतुष्टयं दृश्यते। तत् वैशिष्ट्यमावहति। यथा–

"तत्त्वमसि",

"त्वं तदसि"

"त्वं ब्रह्मासि"

"अहं ब्रह्मास्मि" इति।

महावाक्येषु एषु प्रथमवाक्यं शिष्यं प्रति, अन्तिमं वाक्यं स्वानुभवात्मकं वाक्यम् इत्यपि उक्तं भवति। इह महावाक्यानां

पट्टिकाद्वयं पैङ्गलोपनिषदि याज्ञवल्क्यानुसारेण, शङ्करादिभिः अङ्गीकृतानुसारेण च प्रदत्तं वर्तते। यथा–

पैङ्गलोपनिषदि याज्ञवल्क्यमहावाक्यानि	श्रीशङ्करादिभिः अङ्गीकृतानि अन्योपनिषन्महावाक्यानि
तत्त्वमसि - (तत् प्रज्ञानं त्वम् असि)	तत्त्वमसि
त्वं तदसि - (त्वं तद् ब्रह्म असि)	प्रज्ञानं ब्रह्म
त्वं ब्रह्म असि - (त्वं ब्रह्म भवसि)	अयमात्मा ब्रह्म
अहं ब्रह्मास्मि - (न मे ब्रह्मणा पार्थक्यम्)	अहं ब्रह्मास्मि

एवं महावाक्यानां त्रैविध्यं अत्र प्रथमतया सूचितम्। तत्रत्यानां न्यूनतां वैशिष्ट्यञ्च अधिकृत्य विमर्शनानि च प्रदत्तानि।

तृतीयाध्यायादारभ्य षष्ठाध्यायपर्यन्तं महावाक्यानां समीक्षात्मकं पठनं कृतं वर्तते। इह महावाक्यानाम् अद्वैतद्वैतविशिष्टाद्वैतरीत्या समीक्षा कृता वर्तते। अत्र श्रीशङ्कराचार्यभाष्यवत् मध्वरामानुजयोः भाष्ये महावाक्यमधिकृत्य कदाचित् बहुधा कथनं द्रष्टुं न शक्यते। एवमपि

व्याख्यानत्वेन समादरणीयत्वात् शोधग्रन्थेऽस्मिन् यथार्हं विन्यासो वर्तते। "अयमात्मा ब्रह्म" इति महावाक्यस्य समीक्षा कृता वर्तते। आचार्यत्रयस्यापि भाष्यवचनमनुसृत्य महावाक्यस्यास्य विवरणवेलायां भाष्यवचनानि साकल्येन अत्र न लिखितानि। तथापि भाष्यविषयस्य अन्यूनतया विवरणं आत्मनः शैलीमवलम्ब्य इह कृतं वर्तते। एवं श्रीशङ्करस्य-मध्वस्य-रामानुजस्य च अभिप्रायप्रकटनवेलायां भाष्यात् यथार्हम् उद्धरणं कृत्वा विवरणाय प्रयत्नं कृतवान्। वादप्रतिवादरूपेण महावाक्यस्यास्य अर्थकथनं श्रीमच्छङ्कराचार्येण अतिविस्तृततया कृतं मनीषिणां तृप्तये। आचार्यत्रयस्य पद्धतिमनुसृत्य महावाक्यस्यास्य एकत्र पठनं न केनापि इतः पर्यन्तं कृतं वर्तते। महावाक्यस्यास्य अन्यमहावाक्यनाञ्च वैशिष्ट्यं द्वितीयाध्याये सम्यक् विस्तारितं वर्तते। प्रथमतया यानि औपनिषदिकानि वाक्यानि अर्थविषये अनेन वाक्येन साधर्म्यम् आवहन्ति तेषामपि सङ्कलनं कृत्वा इह प्रदर्शितानि वर्तन्ते। एकस्य महावाक्यस्य सदृशानि द्वात्रिंशत् अन्यानि वाक्यानि इह सूचितानि वर्तन्ते। उपवाक्येन सूचितानां एषाम् उपरि "अयमात्मा ब्रह्म" इति माण्डूक्योपनिषदि अन्तर्भूतस्य वाक्यस्य प्राधान्यं महत्त्वं च द्वितीयाध्याये विस्तृतं खलु। उपवाक्यानां तेषां पट्टिका तत्र प्रदत्ता वर्तते।

“प्रज्ञानं ब्रह्म” इति महावाक्यं ऋग्वेदोपनिषद्भूतस्य ऐतरेयस्य भागः। इह प्रथमं किन्नाम प्रज्ञानमिति विवृतं वर्तते। तदनन्तरं भाष्यत्रयमवलम्ब्य समीक्षात्मकपठनाय यत्नः आरभ्यते। अत्रापि पूर्वोक्तवत् श्रीमच्छङ्कराचार्यस्य भाष्यं पक्षविपक्षरूपेण विस्तरेण प्रतिपादितं वर्तते। मध्वस्तु द्वैतमतानुसारेण ब्रह्मणः इन्द्रत्वं प्रकल्प्य द्वैतं स्थापयति। आचार्यस्यास्य सिद्धान्तानुरोधेन प्रज्ञानरूपः आत्मा एव इन्द्रः प्रजापतिः हरिश्च। मध्वाचार्येण तु नवभिः पद्यैः “प्रज्ञानं ब्रह्म” इति महवाक्यस्य भाष्यं लिखितं दृश्यते।

श्रीरामानुजाचार्यस्य मते ब्रह्म नारायणः भवति। रामानुजाचार्यस्य मतानुयायी भवति रङ्गरामानुजः। अतः रामानुजाचार्यस्य मतविवरणवेलायां रङ्गरामानुजस्य प्रकाशिका नाम व्याख्या अपि आश्रिता वर्तते। रामानुजानुयायिषु पञ्च पण्डिताः विद्यन्ते। ते भारद्वाजरामानुजाचार्यः, रङ्गरामानुजमुनिः, कूरनारायणमुनिः, रामानन्दमुनिः, गोपालानन्दयोगी च भवन्ति। अतः विद्वद्वरेण्यानाम् एतेषाम् अभिप्रायोऽपि प्रसङ्गवशात् इह योजितः वर्तते। “प्रज्ञानं ब्रह्म” इति महावाक्यविषये अपि महावाक्यसदृशानि वाक्यानि अपि सङ्कलितानि।

आहत्य द्वाविंशतिः वाक्यानि इह सञ्चितानि। तेषामपि पट्टिका रेखाचित्ररूपेण अत्र योजिता वर्तते।

अनन्तरं "तत्त्वमसि" इति महावाक्यस्य अन्वेषणात्मकं पठनम्। इदं महावाक्यं छान्दोग्योपनिषदि अन्तर्भवति। अस्य महावाक्यस्य विषये किञ्चित् वैशिष्ट्यम् अत्र उल्लेखनीयं वर्तते। तत्त्वमसीति महावाक्यभागः छान्दोग्योपनिषदः षष्ठाध्याये नववारम् उक्तो वर्तते। उक्तविषयस्य पट्टिका यथा –

१) अध्यायः - ६, खण्डः - ८, मन्त्रः - ७
२) अध्यायः - ६, खण्डः - ९, मन्त्रः - ४
३) अध्यायः - ६, खण्डः - १०, मन्त्रः - ३
४) अध्यायः - ६, खण्डः - ११, मन्त्रः - ३
५) अध्यायः - ६, खण्डः - १२, मन्त्रः - ३
६) अध्यायः - ६, खण्डः - १३, मन्त्रः - ३
७) अध्यायः - ६, खण्डः - १४, मन्त्रः - ३
८) अध्यायः - ६, खण्डः - १५, मन्त्रः - ३
९) अध्यायः - ६, खण्डः - १६, मन्त्रः - ३

पूर्वमहावाक्यविषयवत् महावाक्यस्यास्यापि दलप्रयोजनं सम्यक् कृतं वर्तते। इदं महावाक्यं गुरुशिष्यसंवादान्तर्गतं वर्तते इति वैशिष्ट्यम् आवहति। शिष्यस्य अज्ञानिवारणं कृत्वा तं प्रबुद्धं कर्तुं महावाक्ये अस्मिन् सम्यक् परिश्रमो वर्तते इति अस्य प्राधान्यम्। अत्र तत्त्वोपदेश नाम्ना आचार्येण श्रीशङ्करेण सप्ताशीत्यात्मकः श्लोकग्रन्थः लिखितो वर्तते। लक्षणायाः लक्षणसमीक्षापि महावाक्यस्यास्य विषयविन्यासवेलायाम् आवश्यकी आसीत्।

तत्त्वमसीति पदत्रयात्मके महावाक्ये तत्पदस्य वाच्यार्थः ईश्वरः, त्वं पदस्य वाच्यार्थः जीवः, 'असि' इति क्रियापदं 'तत्' 'त्वम्' इत्यनयोः संयोजकम्। अत एव महावाक्यस्यास्य जीवेश्वरैक्यप्रतिपादकत्वमुक्तम्। इयं रीतिः न युक्ता इति प्रतिभाति। जीवः दुःखमग्नः ईश्वरः प्रज्ञानस्वरूपः सर्वज्ञश्च। जीवेश्वरौ यथाक्रमं परिमितापरिमितौ। अतः जीवेश्वरयोः एकत्वसङ्कल्पे बाधा। अतः अत्र लक्ष्यार्थमादायैव अर्थकथनं कृतम्। एते आशयाः आचार्यमतानुसारेण विस्तृततया कथिताः।

‘तत्त्वमसि’ महावाक्यविषयेऽपि अन्योपनिषदन्तर्गतानां सदृशवाक्यानां समाहरणं कृतं वर्तते। पट्टिकानुसारेण तेषां सङ्कलनमपि अत्र कृतम्। महावाक्यचतुष्टये, अन्तिमं महावाक्यं भवति “अहं ब्रह्मास्मि” इति। अत्रत्यं श्रीशङ्करभाष्यम् अत्यन्तं विस्तृतं भवति। अतः विषयवैविध्यमवलम्ब्य सङ्ख्यापूर्वकं क्रममनुसृत्य इह स्ववाक्येन व्याख्यातं वर्तते। पक्षप्रतिपक्षरूपेण पूर्वपक्षः, समाधानम् इति रीत्या अत्र भाष्यस्य समन्वयः कृतः। इतरमहावाक्यापेक्षया महावाक्यस्यास्य प्राधान्यमपि द्वितीयाध्याये विवृतं वर्तते। महावाक्यस्यास्य आशयगाम्भीर्यमादायैव श्रीशङ्करेण विस्तृततया इह विचारः कृतः। आवर्तनभिया न तस्य सङ्कलनमिह क्रियते।

मध्वोऽपि अन्यमहावाक्यविवरणापेक्षया इह किञ्चिदधिकम् उक्तवान् वर्तते। राघवेन्द्रतीर्थस्य माध्वमतानुयायिनः पण्डितस्य “खण्डार्थ” नाम व्याख्याम् अनुसृत्य माध्वमतसमर्थनाय इह परिश्रमः कृतो वर्तते। श्रीरघूत्तमतीर्थः माध्वप्रस्थानस्थः अन्यः पण्डितः। अतः तस्यापि टिप्पणी, माध्वमतानुसारेण ‘अहं ब्रह्मास्मीति’ महावाक्यस्य विवरणाय उपयुक्ता वर्तते।

श्रीमता रामानुजाचार्येण बृहदारण्यकोपनिषदः भाष्यं न कृतमित्यतः तस्य शिष्याणां विवरणमाश्रित्यैव “अहं ब्रह्मास्मि” इति महावाक्यस्य व्याख्या कृता वर्तते। ‘वेदार्थसङ्ग्रहो’ नाम ग्रन्थतल्लजः श्रीमता रामानुजाचार्येण लिखितो वर्तते। ग्रन्थविशेषस्यास्यापि उपयोगः रामानुजपक्षस्थापनाय कृतः।

इहापि पूर्ववत् अन्योपनिषदन्तर्गतानि ‘अहं ब्रह्मास्मि’ इति महावाक्यसदृशानि कानिचन वाक्यानि समाहृत्य पट्टिकाद्वारा अवतार्यन्ते। अष्टात्रिंशत् सदृशवाक्यानि पट्टिकारूपेण प्रदर्श्यन्ते। एवम् उपनिषदां भाष्यम् आश्रित्य शङ्करमध्ववेदान्तपक्षौ इह प्रतिपादितौ समर्थितौ च। श्रीरामानुजाचार्यः उपनिषदां भाष्यं न पृथक् कृतवान्। अतः रामानुजाचार्यस्य विषये शिष्याणाम् अनुयायिनां च मतमादाय तत्कृतवेदार्थविचारञ्च स्वीकृत्य महावाक्यानां विचारः तत्तन्मतविचारानुसारेण समर्थितो वर्तते ।